
# तेलुगुभाषादिनोत्सवः (29.08.2019)



अगस्तमासस्य २९ तमे दिनाङ्के राष्ट्रियसंस्कृतविद्यापीठे तेलुगुभाषा-दिनोत्सवः उत्साहपूर्णे वातावरणे समाचर्यत । अस्य कार्यक्रमस्य मुख्यातिथयः श्रीवेङ्कटेश्वरविश्वविद्यालयस्य तेलुगुविभागस्य निवृत्ताचार्याः के.सर्वोत्तमरावुमहोदयाः भाषमाणाः प्रत्येकमपि इतरां भाषामात्मनि संयोजयितुं समर्था भाषा तेलुगुभाषा इति उदबोधयन् । सहस्राधिकवर्षात्मिके तेलुगुसाहित्येतिहासे नैकाः प्रक्रियाः प्राचलन्, प्रचलन्त्यश्च सन्ति । सम्प्रति तस्यां दिशि अनुसन्धानात्मकाध्ययनस्य आवश्यकता महती वर्तते । व्यावहारिकी, ग्रान्थिकी, ग्राम्या च इत्येवं बहुविधायाः तेलुगुभाषायाः तत्तत्सन्दर्भेषु प्रयोगः सादरं करणीयः, न तु केवलमेकस्यैवादरः, अवशिष्टेषु च विद्वेषः स्यादिति मुख्यातिथयः प्राबोधयन् ।

सभाध्यक्षत्वेन विद्यापीठस्य शैक्षिकसङ्कायप्रमुखाः आचार्याः राणीसदाशिवमूर्त्तिमहोदयाः समुपास्थापयन् यत्, भाषायां संस्कृत्यां च पर्यवसितं पदजालं तेलुगुपदजालत्वेनैव परिगणनीयम् । तेलुगुभाषा संस्कृतभाषातः महतीं पदसम्पत्तिं समवाप्नोदिति तेषामभिप्राय आसीत् । गौरवातिथित्वेन कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहाभागाः, श्रीपादसुब्रह्मण्यशास्त्रि-गुरजाडप्रमुखाः, तदितरे च कवयः स्वीयरचनासु व्यावहारिकतेलुगुभाषाया एव अग्रताम्बूलं प्रायच्छन् । साहित्यसंस्कृतिसङ्कायप्रमुखाः आचार्य सिहेच्.पि.सत्यनारायणमहाभागाः अवदन् यत्, व्यवहारे प्रयुज्यमानानाम् आंग्लपदानां स्थाने यावच्छक्यं तेलुगुपदानि प्रयोक्तव्यानि इति । कार्यक्रमेऽस्मिन् स्वागतभाषणं तेलुगुविभागाध्यक्षाभिः डॉ.विजयलक्ष्मीमहाभागाभिः, धन्यवादसमर्पणं डॉ.डि.नल्लन्नवर्यैः, सभासञ्चालनं च डॉ.जि.लक्ष्मीनारायणैः विहितम् । अत्र तेलुगुभिन्नाः छात्रा अपि भागमुद्ध्वा समधिकतया कार्यक्रममम्मुं सफल्यकुर्वन् ।





